श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीभगवद्रामानुजमुनिभिरनुगृहीतम्

# ॥ श्रीरङ्गगद्यम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुजमहादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीरङ्गगद्यम् ॥

चिदचित्परतत्त्वानां तत्त्वयाथार्थ्यवेदिने।
रामानुजाय मुनये नमो मम गरीयसे॥

स्वाधीन त्रिविध चेतनाचेतन स्वरूपस्थितिप्रवृत्तिभेदं⋆ क्लेशकर्माद्यशेषदोषासंस्पृष्टं⋆ स्वाभाविकानवधिकातिशय ज्ञानबलैश्वर्य वीर्य शक्तितेजस्सौशील्य वात्सल्य मार्दवार्जव सौहार्द साम्य कारुण्य माधुर्य गाम्भीर्य औदार्य चातुर्य स्थैर्य धैर्य शौर्य पराक्रम सत्यकाम सत्यसङ्कल्प कृतित्व कृतज्ञताद्यसङ्ख्येय कल्याण गुणगणौघमहार्णवं⋆ परब्रह्मभूतं⋆ पुरुषोत्तमं⋆ श्रीरङ्गशायिनं⋆ अस्मत्स्वामिनं⋆ प्रबुद्धनित्यनियाम्य नित्यदास्यैकरसात्मस्वभावोऽहं⋆ तदेकानुभवः⋆ तदेकप्रियः⋆ परिपूर्णं भगवन्तं विशदतमानुभवेन निरन्तरमनुभूय⋆ तदनुभवजनितानवधिकातिशय प्रीतिकारिताशेषावस्थोचित अशेषशेषतैकरतिरूप नित्यकिङ्करो भवानि॥

स्वात्म नित्यनियाम्य नित्यदास्यैकरसात्म स्वभावानुसंधानपूर्वक भगवदनवधिकातिशय स्वाम्याद्यखिलगुणगणानुभवजनित अनवधिकातिशय प्रीतिकारिताशेषावस्थोचित अशेषशेषतैकरतिरूप नित्यकैङ्कर्य प्राप्त्युपायभूतभक्ति तदुपाय सम्यग्ज्ञान तदुपाय समीचीनक्रिया तदनुगुण सात्त्विकतास्तिक्यादि समस्तात्मगुणविहीनः⋆ दुरुत्तरानन्त तद्विपर्यय ज्ञानक्रियानुगुणानादि पापवासना महार्णवान्तर्निमग्नः⋆ तिलतैलवत् दारुवह्निवत् दुर्विवेच त्रिगुण क्षणक्षरणस्वभाव अचेतनप्रकृतिव्याप्तिरूप दुरत्यय भगवन्मायातिरोहित स्वप्रकाशः⋆ अनाद्यविद्यासञ्चितानन्ताशक्य विस्रंसन कर्मपाशप्रग्रथितः⋆ अनागतानन्तकाल समीक्षयाऽपि अदृष्टसंतारोपायः⋆ निखिलजन्तुजात शरण्य !⋆ श्रीमन्नारायण !⋆ तव चरणारविन्दयुगळं शरणमहं प्रपद्ये॥

एवमवस्थितस्याप्यर्थित्वमात्रेण⋆ परमकारुणिको भगवान्⋆ स्वानुभवप्रीत्योपनीतैकान्तिकात्यन्तिक नित्यकैङ्कर्यैकरतिरूप नित्यदास्यं दास्यतीति विश्वासपूर्वकं भगवन्तं नित्यकिङ्करतां प्रार्थये॥

तवानुभूतिसंभूतप्रीतिकारितदासताम्।
देहि मे कृपया नाथ ! न जाने गतिमन्यथा॥

सर्वावस्थोचिताशेषशेषतैकरतिस्तव।
भवेयं पुण्डरीकाक्ष ! त्वमेवैवं कुरुष्व माम्॥

एवंभूत तत्त्वयाथात्म्यावबोध तदिच्छारहितस्यापि⋆ एतदुच्चारण मात्रावलम्बनेन⋆ उच्यमानार्थ परमार्थनिष्टं मे मनः त्वमेवाद्यैव कारय॥

अपारकरुणाम्बुधे !⋆ अनालोचितविशेषाशेषलोकशरण्य !⋆ प्रणतार्तिहर !⋆ आश्रितवात्सल्यैक महोदधे !⋆ अनवरतविदित निखिलभूतजात याथात्म्य !⋆ सत्यकाम !⋆ सत्यसङ्कल्प !⋆ आपत्सख !⋆ काकुत्स्थ !⋆ श्रीमन् !⋆ नारायण !⋆ पुरुषोत्तम !⋆ श्रीरङ्गनाथ !⋆ मम नाथ !⋆ नमोऽस्तु ते॥

॥ इति श्रीरङ्गगद्यम् संपूर्णम् ॥